# श्री दत्तात्रेय स्तोत्रम

| | | | |
|---|---|---|---|
| जटाधरं पाण्डुरंगं शूलहस्तं दयानिधिम्।<br>सर्वरोगहरं देवं दत्तात्रेयमहं भजे ॥ | 1 | जगदुत्पत्तिकर्त्रे च स्थितिसंहारहेतवे।<br>भवपाशविमुक्ताय दत्तात्रेय नमोस्तुते ॥ | 2 |
| जराजन्मविनाशाय देहशुद्धिकराय च।<br>दिगंबर दयामूर्ते दत्तात्रेय नमोस्तुते ॥ | 3 | कर्पूरकान्तिदेहाय ब्रह्ममूर्तिधराय च।<br>वेदशास्त्रपरिज्ञाय दत्तात्रेय नमोस्तुते ॥ | 4 |
| ह्रस्वदीर्घ कृशस्थूल नामगोत्र विवर्जित!<br>पञ्चभूतैकदीप्ताय दत्तात्रेय नमोस्तुते ॥ | 5 | यज्ञभोक्त्रे च यज्ञेय यज्ञरूपधराय च।<br>यज्ञप्रियाय सिद्धाय दत्तात्रेय नमोस्तुते ॥ | 6 |
| आदौ ब्रह्मा मध्ये विष्णुरन्ते देवः सदाशिवः।<br>मूर्तित्रयस्वरूपाय दत्तात्रेय नमोस्तुते ॥ | 7 | भोगालयाय भोगाय योगयोग्याय धारिणे।<br>जितेन्द्रिय जितज्ञाय दत्तात्रेय नमोस्तुते ॥ | 8 |
| दिगंबराय दिव्याय दिव्यरूपधराय च।<br>सदोदित परब्रह्म दत्तात्रेय नमोस्तुते ॥ | 9 | जंबूद्वीप महाक्षेत्र मातापुर निवासिने।<br>भजमान सतां देव दत्तात्रेय नमोस्तुते ॥ | 10 |
| भिक्षाटनं गृहे ग्रामे पात्रं हेममयं करे।<br>नानास्वादमयी भिक्षा दत्तात्रेय नमोस्तुते ॥ | 11 | ब्रह्मज्ञानमयी मुद्रा वस्त्रे चाकाशभूतले।<br>प्रज्ञानघनबोधाय दत्तात्रेय नमोस्तुते ॥ | 12 |
| अवधूत सदानन्द परब्रह्मस्वरूपिणे ।<br>विदेह देहरूपाय दत्तात्रेय नमोस्तुते ॥ | 13 | सत्यरूप सदाचार सत्यधर्मपरायण<br>सत्याश्रय परोक्षाय दत्तात्रेय नमोस्तुते ॥ | 14 |
| शूलहस्त गदापाणे वनमाला सुकन्धर ।<br>यज्ञसूत्रधर ब्रह्मन् दत्तात्रेय नमोस्तुते ॥ | 15 | क्षराक्षरस्वरूपाय परात्परतराय च।<br>दत्तमुक्तिपरस्तोत्र! दत्तात्रेय नमोस्तुते ॥ | 16 |
| दत्तविद्याड्यलक्ष्मीश दत्तस्वात्मस्वरूपिणे।<br>गुणनिर्गुणरूपाय दत्तात्रेय नमोस्तुते ॥ | 17 | शत्रुनाशकरं स्तोत्रं ज्ञानविज्ञानदायकम्।<br>आश्च सर्वपापं शमं याति दत्तात्रेय नमोस्तुते॥ | 18 |
| इदं स्तोत्रं महद्दिव्यं दत्तप्रत्यक्षकारकम्।<br>दत्तात्रेयप्रसादाच्च नारदेन प्रकीर्तितम् ॥ | 19 | इति श्रीनारदपुराणे नारदविरचितं<br>श्रीदत्तात्रेय स्तोत्रं संपुर्णमं ॥ | 20 |

